शारदा-गौरव-ग्रन्थ-माला ... ५२

श्र म गी ता ।

लेखकः

महाकविः डॉ. श्रीधर भास्कर वर्णेकर

★

गुरुपूर्णिमा, जुलै १९७७

मूल्यम् २ रूप्यकम्

शारदा-गौरव-ग्रन्थ-माला ... ५२

श्र म गी ता ।

लेखकः

महाकविः श्रीधर भास्कर वर्णेकर

☆

गुरुपूर्णिमा, जुलै १९७७

मूल्यम् २ रूप्यकम्

प्रकाशकः
पं. वसन्त अनन्त गाडगीळ
शारदा-गौरव-ग्रन्थ-माला
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०

卐

सर्वाधिकाराः प्रकाशकायत्ताः

卐

मुद्रकः
पं. वसन्त अनन्त गाडगीळ
श्रीशारदा-मुद्रण-सिद्धि-मन्दिरम्
४२५ सदाशिव पेठ, पुण्यपत्तनम् ३०
यशवन्त-मुद्रणालयः
१८३५ सदाशिव पेठ, पुण्यपत्तनम् ३०

सरसंघचालकानां श्री. देवरसमहोदयानां पुरस्कारः ।

अखिल-भारतीय-कीर्तिमतां व्युत्पन्न-पण्डितानां सव्यसाचि-लेखकानां डॉ. श्री. भा. वर्णेकर-महोदयानां "श्रमगीता" इत्याख्यां नवीनां काव्यकृतिम् उद्दिश्य लेखनावसरे आनन्दातिशयः खलु मे जायते। मानवानां शाश्वत-कल्याण-मार्ग-प्रदर्शकेषु ग्रन्थेषु श्रीमद्-भगवद्गीतायाः अनन्यसाधारणं स्थानं वर्तते। अतः जीवनोद्धारक-सिद्धान्त-प्रवर्तकान् गौण-प्रमुखान् ग्रन्थान् "गीता" इति नाम्ना परंपरया निर्दिशन्ति। तामेव परंपराम् अनुसृत्य डॉ. वर्णेकराणाम् इयम् अल्पाकारा श्रेष्ठ-गुणा काव्यकृतिः "श्रम-गीता" इति अन्वर्थक-नाम्ना शोभते।

श्रम-प्रतिष्ठा हि वादातीतं जगन्मान्यं तत्त्वम् अस्ति। श्रमम् अनवलम्ब्य व्यक्तेः समानस्य वा उत्कर्षः अशक्यः एव। द्वयोः महा-युद्धयोः प्रचण्डाघातैः क्षत-विक्षतस्य जर्मन-देशस्य अद्यतनं वैभव-शालि-स्वरूपं, सर्वनाशिना अणु-स्फोटकेन भस्मीभूतस्य जपान-देशस्य रक्षातः संजीव्य उच्चैः आकाशे भ्रमतः फिनिक्स-पक्षिणः इव दुर्निवारं प्रगति-पथाक्रमणम् अथवा इस्रायल-देशे वालुकामय-प्रदेशस्य नन्दनवने रूपान्तरीकरणम् इत्येते चमत्काराः तद्देशीय-जनतायाः अश्रान्त-परिश्रमेणैव समपद्यन्त। सर्वेषां विकसितानां प्रगतानां च राष्ट्राणां विजये इदमेव वक्तुं युज्येत। वस्तुतः अस्माकं भारतीय-परंपरायाम् अपि श्रमस्य असाधारणं महत्त्वं दत्तम् अस्ति। अस्मदीय-शास्त्रेषु अपि श्रमं विना भुञ्जानस्य निषेधः कृतोऽस्ति। परम् अस्माकं समाज-जीवने कृतास्पदासु अनेक-विकृतिषु श्रमविषयिणी अनास्था किंबहुना घृणा वा कापि भयावहा विकृतिः स्पष्टतया दृश्यते। सर्वसामान्यस्य जनस्य तु श्रमं विना अन्यः तरणोपायः नास्ति। परं सुशिक्षितंमन्याः

सधन-ब्रुवाणाश्च शारीरिक-श्रम-करणं स्वप्रतिष्ठायाः शोभावहं नास्ति इति मन्यन्ते। शिक्षणस्य धनस्य वा वृद्धया सह श्रम-विषयिणी अनास्था तिरस्कारो वा वृद्धिं भजते इति सार्वत्रिको दुःख-दायकः अनुभवः अस्ति। त्रिंशद-(३०) वर्षात्मके स्वातन्त्र्यो-त्तर-काले विविधाः योजनाः अपेक्षितं यशो न प्राप्नुवन् इत्यत्र गुणवतां बहुसंख्याकानां परिश्रमानवलम्बनं खलु प्रधानं कारणम् अस्ति। अस्याः विकृतेः विनाशनं तथा श्रम-विषयके प्रचलिते दृष्टिकोणे आमूलाग्रं परिवर्तनं खलु कालोऽयं समपेक्षते।

अत एव अहम् अस्याः श्रमगीतायाः स्वागतं करोमि। डॉ. वर्णेकराणां संस्कृतभाषा सुबोधा प्रासादिकी च अस्ति तथा रचना च गीता-सदृशी अर्थवाहिनी अस्ति। 'श्रम एव मनुष्याणां कारणं हित-सौख्ययोः' (मन एव मनुष्याणां कारणं बन्धमोक्षयोः। इतिवत्) किंवा—साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः।' —इत्यादयः पङ्क्तयः वाचकानां स्मृतिम् उज्ज्वलयन्ति। आधुनिके काले श्रम-प्रतिष्ठायाः साक्षान्मूर्तिः खलु गान्धि-महात्मा! तस्य मुखेन श्रीगीतायाः उद्गान-कारणेन डॉ. वर्णेकरैः नूनं समयज्ञता प्रकटीकृता। अस्याः श्रमगीतायाः सार्वत्रिकः प्रचारः अत्यावश्यकोऽस्ति। ईदृश्याः उद्बोधिकायाः काव्यकृतेः पठनेन चिन्तनेन च परिश्रम-प्रेरणां लोकाः लभेरन् इति मे विश्वासः। एवंविधायाः अस्याः अमूल्य-काव्यकृतेः रचयितुः डॉ. श्री. भा. वर्णेकरमहाशयस्य अहं हार्दिकम् अभिनन्दनं करोमि।

रा. स्व. संघ-केन्द्रकार्यालयः	म. द. देवरस
डॉ. हेडगेवार-भवनम्	(सरसंघचालकः)
नागपुरम् ४४० ००२	दि. ९ जून १९७७

श्रमगीता

महात्मा उवाच—

अथैकदा महात्मानम्
सर्वलोक-नमस्कृतम् ।
सत्याग्रह-प्रवक्तारम्
विश्वशान्ति-परायणम् ।। १

स्वनामधन्यं तं गान्धी-
नामानम् अतिविश्रुतम् ।
प्रार्थना-समये प्राप्ताः
केऽपि लोक-धुरन्धराः ।। २

श्रीराजेन्द्रप्रसादोऽसौ-
आद्यो राष्ट्रपतिर्महान् ।
उपराष्ट्रपती राधाकृष्णः
तत्त्वविदां वरः ।। ३

वल्लभो राजनीतिज्ञो
महोत्साहो जवाहरः ।
मर्मज्ञो राजगोपाला-
चार्योऽन्येऽपि सुविश्रुताः ।। ४

सर्वेऽपि भारतोद्धार-
संचिन्तन-परायणाः ।
दिक्पाला इव राष्ट्रेऽस्मिन्
लोकपाला जनप्रियाः ।। ५

प्रार्थना-सुप्रसन्नं तम्
प्रणम्य गुरुमात्मनः।
अन्तेवासीव सश्रद्धम्
निजगाद जवाहरः ॥ ६

हे तात! तिलकादीनां
भवतश्च विशेषतः।
म तपोभिः संप्राप्तं
स्वातन्त्र्यं हर्षकारणम् ॥ ७

जवाहर उवाच—

नवोदित-स्वराज्यस्य धूरस्मासु निवेशिता।
परम-श्रद्धया लोकैर् ऐकमत्येन सर्वथा ॥ ८

चिरस्य पारतन्त्र्येण निर्धनं राष्ट्रमद्य नः।
अन्न-वस्त्र-गृहहीनाः कष्टं जीवन्ति बान्धवाः ॥ ९

इदानीम् अर्थशास्त्रज्ञाः शिक्षा-शास्त्र-विशारदाः।
वैज्ञानिकास्तान्त्रिकाश्च कला-साहित्य-कोविदाः ॥ १०

सर्वाङ्गीणविकासार्थं राष्ट्रस्यास्य महीयसः।
प्रकल्पयन्ति विविधा योजना भाग्य-भावनाः ॥ ११

तासां साफल्य-सिद्धयर्थं नानादेशेभ्य आहृतम्।
प्रभूतं धन-साहाय्यं मया तावद् अनिच्छता ॥ १२

ऋण-कर्ता पिता शत्रू राष्ट्रनेता तु मित्रवत् ।
ऋणं कुलस्य घाताय राष्ट्रस्य तु हिताय तत् ॥ १३

न परं योजनाऽऽलेखैर् न पदार्थसहायतः ।
समुत्कर्षं प्रपश्यामि राष्ट्रस्यास्य कथंचन ॥ १४

क्रान्तदर्शी रहस्यज्ञस्तथ्यवाक् पथ्य-बोधकः ।
त्वादृग् जगद्गुरुर्लोके त्वमेव खलु सांप्रतम् ॥ १५

दारिद्र्य-दैन्य-लग्नस्य राष्ट्रस्यास्य महीयसः ।
सर्वंकषोत्कर्षमूलं महामन्त्रं निवेदय ॥ १६

श्रीजवाहरलालस्य प्रार्थना सा सुमन्त्रिणः ।
अनूदितेव सानन्दम् अन्यैं राष्ट्र-धुरंधरैः ॥ १७

ततः शृण्वन् इव स्वान्तः-स्वनन्तीं गिरमात्मनः ।
तमुवाच महात्माऽसौ भगवान् इव भारतम् ॥ १८

महात्मा प्रोवाच—

स्वागतं वो महाभागा ! राष्ट्रोद्धार-परायणाः ।
विजयोऽस्तु सदा लोके लोक-कल्याण-काङ्क्षिणाम् ॥ १९

राज्याधिकारो हि महान् भारो जगति मे मतः ।
किरीटः कण्टकाकीर्णः स नूनम् अधिकारिणाम् ॥ २०

प्रोत्साह्यन्ते सुखं लोकाः स्वातन्त्र्य-समरोद्यमे ।
निजोद्धारे पुनस्तेषां दुर्घटं हि प्रवर्तनम् ॥ २१

यथा लोका महोत्साहा परस्योत्साद-कर्मसु ।
हन्त ! स्वोद्धार-कार्येषु निरुत्साहा भवन्ति ते ॥ २२

रक्षणं भरणं ज्ञानम् आधि-व्याधि-निवारणम् ।
शासकीयानुदानैस्ते सर्वथेच्छन्ति सर्वदा ॥ २३

निरुद्यमं निरुत्साहं समाजं निष्परिश्रमम् ।
नैवोद्धारयितुं शक्तः साक्षाद् ब्रह्माण्ड-नायकः ॥ २४

आत्मैव ह्यात्मनो बन्धुः आत्मैव रिपुरात्मनः ।
भगवानपि लोकेऽस्मिन् बन्धुरात्मावलम्बिनाम् ॥ २५

महतोऽपि हि राष्ट्रस्य परराष्ट्रावलम्बिनः ।
रक्षणे भरणे ज्ञाने समुत्थानं न शक्यते ॥ २६

आलस्याभिभवाद् यानि न भजन्ते परिश्रमम् ।
तानि शीघ्रं विनश्यन्ति राष्ट्राणि सुमहान्त्यपि ॥ २७

अग्रेसराणि राष्ट्राणि सन्ति तान्येव भूतले ।
योगक्षेमकरो यत्र सेव्यते संततः श्रमः ॥ २८

ध्वस्तान्यपि महायुद्धै राष्ट्राण्युत्थापयन्ति ते ।
यैः समाराध्यते भक्त्या महान् देवः परिश्रमः ॥ २९

कृषण-कायः स्विन्न-गात्रो लाङगली धूलि-धूसरः ।
तपन् क्षेत्रे श्वसन् उच्चैः कोऽपि देवः परिश्रमः ॥ ३०

राधाकृष्ण उवाच—

अपूर्वः श्रम-देवोऽयं महात्मन् वर्णितस्त्वया ।
विश्व-दैवत-शास्त्रेषु कथितो यो न कुत्रचित् ॥ ३१

सुखैषिणो जना ह्यत्र परिश्रम-पराङमुखाः ।
त्वदुक्तं न विजानन्ति श्रम-माहात्म्यमद्भुतम् ॥ ३२

नवीन-युगधर्मस्य त्वमेवासि प्रवर्तकः ।
भूयः कथय भाग्यस्य रहस्यं ह्येतदुत्तमम् ॥ ३३

महात्मा उवाच —

आलस्यस्य परित्यागः श्रमस्य परिपूजनम् ।
नृणां विधिनिषेधात्मा धर्मोऽयं सार्वलौकिकः ॥ ३४

क्षीयन्ते यानि पापानि योग-याग-जपादिभिः ।
श्रम-संकल्पमात्रेण तानि नश्यन्ति तत्क्षणम् ॥ ३५

द्व्यक्षरो हि मतः स्वर्गः त्र्यक्षरो नरको ध्रुवम् ।
श्रमोऽतोऽत्र मतः स्वर्ग आलस्यं नरकास्पदम् ॥ ३६

आलस्ये रममाणस्य श्रमाय समसूयतः ।
जनस्य गेहे राष्ट्रे वा दारिद्र्यं रमतेतराम् ॥ ३७

नाभूवन् न भविष्यन्ति न भवन्तीह भूतले ।
सुसमृद्धानि राष्ट्राणि विनाऽश्रान्त-परिश्रमम् ॥ ३८

आत्मोद्धाराय लोकेऽस्मिन् तथा सर्वोदयाय च ।
श्रमो विधात्रा विहितो गरीयान् राजदण्डतः ॥ ३९

श्रमो धत्ते जगत् सर्वं श्रमो राष्ट्रं सुरक्षति ।
श्रमो वर्धयते लोकान् नान्यो धर्मः श्रमं विना ॥ ४०

दण्डस्य हि भयाल्लोको भोगायात्र प्रवर्तते ।
श्रमस्य प्रणयात् किंतु भुङ्क्ते भोगान् विना भयम् ॥ ४१

विभवोत्कर्षयोर् दाता हन्ता दारिद्र्य-दैन्ययोः ।
न राजा नाऽथ वा देवो विनैकं तं परिश्रमम् ॥ ४२

भूमिरेनं निगिरति कालः कलयतेऽथ वा ।
भोगारक्तं सुखासक्तं समाजम् अपरिश्रमम् ॥ ४३

नाश्रमी वसुधां भुङ्क्ते नाश्रमी सुखमेधते ।
बिभर्ति नाश्रमी कश्चित् स्वात्मानं वा कुटुम्बकम् ॥ ४४

न श्वसन्ति न जीवन्ति नाश्नुवन्ति मनाक् सुखम् ।
विना श्रमेण केऽप्यत्र श्रमलोको ह्ययं ध्रुवम् ।। ४५

श्रमश्चेन्न भवेत् लोके विनश्येयुरिमाः प्रजाः ।
आलस्येनाभिभूतास्ताः श्रेयः प्रेयश्च नाप्नुयुः ।। ४६

संबिभर्ति सुसंपत्सु संरक्षति विपत्सु च ।
संवर्धयति सामर्थ्यं सर्वथा भगवान् श्रमः ।। ४७

श्रम एव मनुष्याणां कारणं हित-सौख्ययोः ।
विभवोत्कर्षयोर्योग-क्षेमयोः स्वर्ग-मोक्षयोः ।। ४८

न योगो नाऽथवा क्षेमः कस्याप्यत्र श्रमं विना ।
विना श्रमं प्रवर्धन्ते न श्रियो नाऽथवा धियः ।। ४९

अकृष्ट्वा धान्यदं क्षेत्रम् अनुत्कीर्य तथाऽऽकरम् ।
अकृत्वा कौशलं कार्ये भवे न विभवाऽऽगमः ।। ५०

न मन्त्रैर्नाथ वा तन्त्रैः न होमैर्न पुनर्जपैः ।
भाग्यं फलति कस्यापि विनैकं तं परिश्रमम् ।। ५१

राजसूयाद् वाजपेयाद् ज्योतिष्टोमाच्च सर्वथा ।
भवेत्तोषाय देवानां श्रम-यज्ञो निरग्निकः ।। ५२

न तपस्तत्त्वतो निद्रा-भोजनादि-नियन्त्रणम् ।
सन्तत-श्रम-निष्ठत्वं तपो हि परमोत्तमम् ।। ५३

राजेन्द्र उवाच—

योऽयं श्रममयो धर्मस्त्वया तात निवेदितः ।
समर्थः स निराकर्तुं दैन्य-दुःखमयं तमः ।। ५४

श्रोतुम् इच्छामि तद् भूयो धर्मम् एनम् अनुत्तमम् ।
तृप्येत् को नु जनः शृण्वन् सतां श्रेयस्करं वचः ।। ५५

नव्ये श्रममये धर्मे तेषां
सदनुयायिनाम् ।
प्रवर्धमानां जिज्ञासाम्
ज्ञात्वा तुष्टोऽभवन्मुनिः ॥ ५६

क्षणम् आमील्य नयने
प्रसन्ने क्रान्त-दर्शिनि ।
भूयोऽप्यन्तर्गिरं शृण्वन्
महात्मा पुनरब्रवीत् ॥ ५७

महात्मा प्रोवाच —

गो-धान्य-धन-दानानि प्रशस्यान्यपि सर्वथा ।
शरीर-श्रम-दानस्य कलां नार्हन्ति षोडशीम् ॥ ५८

शमिनो दमिनस्तद्वद् यागिनो योगिनोऽपि च ।
तेऽजस्रं श्रमिणः क्षेत्रे तुलां नार्हन्ति कर्हिचित् ॥ ५९

प्रश्राम्यन् पङ्किले क्षेत्रे पङ्क-लिप्त-तनुर्हि यः ।
स वन्द्योऽश्रमिणः साधोर् भस्माङ्कित-तनोरपि ॥ ६०

श्रमिणो व्रण-चिह्नानि क्षेत्रेऽरण्ये रणेऽथ वा ।
तानि प्रवाल-मालाभ्यो रोचिष्मन्ति विभान्ति मे ॥ ६१

स्वश्रमोपार्जितं ह्यन्नं तत् नूनं परमामृतम् ।
न तत् क्षीराब्धि-संभूतं न वा यज्ञहुतं हविः ॥ ६२

श्राम्यन्ति गृहिणो यत्र सर्वेऽपि सततं गृहे ।
स्वच्छता सुव्यवस्था च राजते तत्र देवता ॥ ६३

न तद् बिभर्ति पावित्र्यं गाङ्गं वा यामुनं जलम् ।
कृषीवलस्य तप्तस्य कायोत्थं श्रमवारि यत् ॥ ६४

यदाज्याहुतिभिः पुण्यं दीर्घ-सत्रेष्ववाप्यते ।
नूनं शतगुणं तस्मात् क्षेत्रेषु जलसिञ्चनैः ॥ ६५
श्राम्यन्तः खलु यज्वानः श्राम्यन्तः खलु योगिनः ।
श्राम्यन्त एव दातारः श्रीमन्तो न कथंचन ॥ ६६
श्रीमन्तः श्रमवन्तश्च नैव तुल्या कदाचन ।
भान्ति रत्नोपलैरेके श्रमवारिकणैः परे ॥ ६७
श्रीमतां श्रम-हीनानां भारात् खिन्नां वसुन्धराम् ।
प्रीणयन्ति स्वकौशल्यैः श्राम्यन्तः कारुशिल्पिनः ॥ ६८
जयन्ति ते कलावन्तः सन्तत-श्रम-नैष्ठिकाः ।
येषाम् अद्भुतनिर्माणैर् जगदेतत् अलंकृतम् ॥ ६९
धिग् धिक् तं मांसलं देहं रूप-यौवन-शालिनः ।
यो न धत्ते श्रमाभावाद् गात्र-स्नायु-कठोरताम् ॥ ७०
न मुक्तासु न हीरेषु तत् तेजः खलु राजते ।
शिल्पिनः श्रम-तप्तस्य स्वेदाम्बु-कणिकासु यत् ॥ ७१
मांसलोऽपि हि कायोऽसौ नूनं पाषाण-निर्मितः ।
न यः परिश्रमैरेति प्रस्विन्नाखिल-गात्रताम् ॥ ७२
प्रियं पद्मादपीशस्य नीहारकणिकाचितात् ।
मुखं स्वेदाम्बु-संक्लिन्नं शिल्पिनः श्रमजीविनः ॥ ७३
अपरिश्राम्यतः साधोर् अपि काषाय-वाससः ।
चीरं श्रम-जल-क्लिन्नं पवित्रं श्रमजीविनः ॥ ७४
श्रमातिरेक-क्लान्तस्य या ग्लानिः श्रमिणो भवेत् ।
ध्यान-स्थितेरपि श्लाघ्या सा खल्वश्राम्यतो मुनेः ॥ ७५
निद्रालस्योत्थितं सौख्यं संमतं स्याद् दुरात्मनाम् ।
पुण्यात्मनां सतां तत् तु सन्तत-श्रम-संभवम् ॥ ७६

अधनेनापि जीयन्ते श्रमिणा धन-संपदः ।
सधनेन तु हीयन्तेऽश्रमिणा कुल-संपदः ॥ ७७

पद-वाक्यमयी वाणी जिह्वयैव निगीर्यते ।
सा तु श्रममयी वाणी सर्वैरङ्गैर् उदीर्यते ॥ ७८

श्रमेण दुःखं यत् किञ्चित् कार्यकालेऽनुभूयते ।
कालेन स्मर्यमाणं तत् प्रमोदायैव कल्पते ॥ ७९

युद्ध-दान-दया-धर्म-परा वीराश्चतुर्विधाः ।
ते सर्वे श्रमवीरस्य तुलनां यान्ति न क्वचित् ॥ ८०

तपस्विभ्योऽथ कर्मिभ्यो ज्ञानिभ्योऽपि च योऽधिकः ।
मतो योगी ततो नूनं सत्कार्येषु परिश्रमी ॥ ८१

पुष्पिण्यौ श्रमिणो जङ्घे गतिर्धीरोद्धता तथा ।
व्यूढं वक्षो दृढावंसौ वपुरारोग्यमन्दिरम् ॥ ८२

श्राम्यतः शुभकार्येषु जागरूकतयाऽनिशम् ।
श्रम-श्रान्तानि नियतं दैन्यानि खलु शेरते ॥ ८३

ज्ञान-भक्ति-विहीनोऽपि यः श्राम्यति सुकर्मसु ।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः ॥ ८४

अपि पाप-ग्रहाः सर्वे पाप-राशिष्ववस्थिताः ।
न क्षमाः श्रमदेवस्य भावि-भाग्य-क्षयाय ते ॥ ८५

वल्लभ उवाच—

अपूर्वः श्रम-सिद्धान्तो यस्त्वया नो निवेदितः ।
उदर्क-भूति-कल्याणः स हि चिन्तामणिर्ध्रुवम् ॥ ८६

भूयः श्रावय तं नव्यं सिद्धान्तं सूक्ति-सुन्दरम् ।
अमृतं मर्त्यलोकेऽस्मिन् सदुक्तं हि महात्मनः ॥ ८७

ततो मित्रवदुद्वीक्ष्य क्षणं तं लोहपूरुषम् ।
उवाच सुस्मितां वाचं कोऽप्यसौ पुण्यपूरुषः ॥ ८८

महात्मा प्रोवाच —

अप्युन्नत-पदारूढः श्रमं नैव परित्यजेत् ।
श्रमणः खलु राजाऽसौ यः सन्तत-परिश्रमी ॥ ८९

स्वर्गता अपि जीवन्ति कीर्तिरूपेण ते भुवि ।
चमत्कृता हि यैर्लोका अविश्रान्त-परिश्रमैः ॥ ९०

न क्रमागत-वित्तेन न जात्या सुप्रतिष्ठया ।
पुरुषः श्लाघ्यतां याति स श्लाघ्यो यः परिश्रमी ॥ ९१

दर्शनीयो हि लोकेऽस्मिन् दरिद्रोऽपि परिश्रमी ।
राजाऽप्यदर्शनीयोऽसौ यो न श्राम्यति कर्हिचित् ॥ ९२

अखण्डितमविश्रान्तं यः श्रमं कुरुते नरः ।
श्रियो भूतेः सुकीर्तेश्च लोकेऽसावेव भाजनम् ॥ ९३

स चापि महनीयोऽत्र श्राम्यति स्वहिताय यः ।
किं पुनर्हितसौख्याय परेषां यः परिश्रमी ॥ ९४

श्रमो हि परमो धर्मः शाश्वतः सार्वलौकिकः ।
श्रमासक्तिः परा भक्तिः भुक्ति-मुक्ति-प्रदायिनी ॥ ९५

श्रमदानं महादानं देवानामपि दुर्घटम् ।
श्रमवारि ब्रह्मवारि स्वर्लोकेऽपि सुदुर्लभम् ॥ ९६

योगिनामपि सर्वेषां पूजनीयो हि सर्वथा ।
एकाकी प्रतपन् क्षेत्रे श्रमयोगी कृषीवलः ॥ ९७

श्रमयोगी महायोगी श्रमिको धार्मिको महान् ।
श्रमाचारी ब्रह्मचारी श्रमशीलो हि शीलवान् ॥ ९८

श्राम्यन्तोऽविरतं लोके श्रेयांसो वृषभा हि ते ।
अलसाः किन्तु न श्लाघ्या सिंहा गह्वर-शायिनः ॥ ९९

ब्रह्मर्षीणां कुले जातो भूदेवो न हि तत्त्वतः ।
अकुलीनोऽपि भूदेवो यो भुवं संप्रसेवते ॥ १००

पूजार्हो नरदेवानां भूदेवानां च सर्वथा ।
श्रमदेवो महात्माऽसौ निशि जाग्रन् दिवा तपन् ॥ १०१

भूदेवानां नृदेवानां देवानां स्वर्गिणामपि ।
श्रमदेवो हि पूजार्हः प्राणिनां वृषभो यथा ॥ १०२

वृषो हि भगवान् धर्मो मुनीनामिह संमतः ॥
परिश्राम्यत्यविश्रान्तं यदसौ लोकहेतवे ॥ १०३

शोचनीयो यथा लोके पतितो निर्धनो जडः ।
श्रमात् पराजितो नूनं शोचनीयतरस्ततः ॥ १०४

कृशोत्साहः कृशबलः कृशकर्मा कृशश्रमः
स एव हि कृशो नूनं न शरीरकृशः कृशः ॥ १०५

ये शास्त्र-पण्डिता लोके येऽथवा शस्त्र-पण्डिताः ।
श्रमिकैरेव पाल्यन्ते देवैराराधका इव ॥ १०६

श्रमिकं निर्धनं चापि भूदेवा भूभृतस्तथा ।
वणिजोऽप्युपजीवन्ति श्रमिको जीवनप्रदः ॥ १०७

ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
सर्वेऽपि सुखमेधन्ते श्रमिकाणां श्रमैरिह ॥ १०८

श्रमनीत्यां प्रणीतायां सर्वे सिद्ध्यन्त्युपक्रमाः ।
धर्मार्थ-काम-मोक्षार्था ऐहिकाः पारलौकिकाः ॥ १०९

दुःखोदर्कं सुखं नूनं विलासालस्य-संभवम् ।
दुःखं चापि सुखोदर्कं सत्कर्म-श्रम-संभवम् ॥ ११०

यद् यावल्लभ्यते ज्ञानं ग्रन्थ-संभार-वाचनैः ।
ततः शतगुणं तत्-तत्-क्षेत्रेषु सुपरिश्रमैः ॥ १११

श्राम्यन्ति स्वहितार्थाय परार्थाय विशेषतः ।
तेषां हि श्रम-निष्ठानां परमात्मा सहायकः ॥ ११२

तदलं बहु भाषित्वा श्रम-माहात्म्यमद्भुतम् ।
हृदये धार्यतां नित्यं तत्त्वमेतदनुत्तमम् ॥ ११३

श्रमो रामः श्रमः कृष्णः श्रमः शंभुः श्रमः प्रभुः ।
श्रमो बुद्धः श्रमः ख्रिस्तः श्रमः पैगम्बरोऽथ वा ॥ ११४

श्रमो दाता श्रमो नेता श्रमो माता पिता श्रमः ।
कर्ता कारयिता लोके ह्येको देवः परिश्रमः ॥ ११५

राजगोपालाचार्य उवाच —

महात्मना त्वया प्रोक्ता श्रमयोग-प्रशंसिनी ।
वाणीयं श्रमगीता हि नवीनोपनिषद् ध्रुवम् ॥ ११६

सुभाषितमयीम् एनां श्रमगीतां प्रमाणयन् ।
सर्व-लोकाग्र-पूज्योऽसौ श्रमयोगी भवेन्महान् ॥ ११७

श्रमधर्ममिमं पुण्यं श्रद्धया यः समाचरेत् ।
स भवेद् भगवन्मान्यो धार्मिकाणां शिरोमणिः ॥ ११८

॥ इति श्रीश्रीधर-विरचितासु नवोपनिषत्सु
महापुरुष-संवादे 'श्रमगीता' समाप्ता ॥

एकम् एव अद्वितीयम्
संस्कृतं पाक्षिकम्

शारदा

संपादकः वसन्त अ. गाडगीळ.

खजिना-महाल-भवनम् 425 सदाशिव
पत्र-मञ्जूषा 750, पुण्यपत्तनम् 411 030

वार्षिकं मूल्यम् २० रूप्यकाः

अद्य एव ग्राहकत्वं स्वीकृत्य
भाषा-समृद्धिः संपाद्यताम् ।